॥ अथ सप्तमोऽध्याय: ॥ Chapter-7

वशिष्ठ उवाच:- अथासौ नृपशार्दूल देवर्षिर्नारदस्तदा ।
ए(१)इ बी ई
जगाम दुग्धपाथोधौ द्रष्टुं पतगकेतनम् ॥ १

२ बी ।
समायांतं परिज्ञाय चेतसा सर्वगामिना
हरिरप्यंबुधिजला त्प्रादुरासी त्पुरो नृप ॥ २

प्रणम्य दंडपातेन ब्रह्मांडाधारमच्युतम् ।
मुनिर्विज्ञापयामास वासुदेवं सगौरवात् ॥ ३

बी३
नारद उवाच :- देवदेव जगन्नाथ विश्वभावन केशव ।
(४)बी
भृगुगेहे समुत्पन्नां प्रेयसीं स्मरसे न किं ॥ ४

ए (२)
या देवी सर्वभूतानां शक्तिरूपेण वर्तते ।
बी(५)
मर्त्यलोकेऽवतीर्णा सा तवैव सहचारिणी ॥
ह
तामुद्वहमहालक्ष्मीं लोकाभ्युदयकारिणीं ॥ ५

भगवानुवाच :- संकल्पोऽयं हृदि पुरा देवर्षे मम वर्तते ।
बी ६
तत्करिष्ये यथार्थत्वं मम मत्या द्विजोत्तम ॥ ६

माघस्य विमले पक्षे पुण्ये एकादशी दिने ।
बी ७
नक्षत्रे सोमदैवत्ये उद्वोढास्मि भृगो: सुतां ॥ ७

------

१- ई बी पतंग इ इ पमकेतनम् , २- ई बी- २ ह, ३- ई बी ३ वा, ई बी(४) समायुत्पन्नां प्रेरसीस्मर सैनकि ए तवैव प्रेयसींस्मर, ५- ई बी तीर्णा चतवैव, ६- ई बी द्विज: ई द्विजा:, ७- ई बी ती - ए ८- भृगो:

--------

ए(१) द्रष्टुं

तन्निशम्य मुनिर्वाक्यं मृगोगत्वा न्यवेदयत् ।
ब्रह्मलोकं ययौ शीघ्रं ज्यामुक्त इव मार्गणः ।। ८

तदाप्रभृति सा देवी मुक्तशेशवलक्षणा ।
ए(१)
आरूढयौवना ध्यानं दधार धरणीधरे ।। ९

ए.(२)
स्तंबेरमद्विजच्छंदपांडुगंड्युतिन्नृप ।
पीनोन्नतस्तनी बाला नितंबभरमंथरा ।। १०

हृदयस्थस्य निःशेषभुवनेशस्य धारणात् ।
१ बी
अंशैः समावृता देवी दिव्यदैवसुतोपमा ।। ११

उत्कंठा विधुरा तन्वी धृतिं नाप तपोवने ।
२ बी
क्रीडन्ती मुनिकन्याभि र्बलिवृन्दाभिषेचने : १२

एवं तस्या जगन्नाथसमागमसमीहया ।
क्रा ए(४)
कृष्टादागच्छदुद्वाहवासरः शुभलक्षण : ।। १३

अथ तस्मिन् क्षणे पुण्ये सुरौघैरावृतो हरिः ।
तत्रायातो महाराज क्षीरसागररोधसः ।। १४

४
ब्रह्मलोकाच्चतुर्वक्त्रः संयुतो ब्रह्मदर्शिभिः ।
कैलासशिखरादेवं सगणः शशिशेखरः ।। १५

-----

१- ई-बी- दैवं, २- ई-बी- सुवाला ३-ए- धं, ४- ए- त्कः
उत्कंग विधुरातन्या । धृतं नर्पितयौवने ।

-----

१- ए- रू, २- ए- हृद ३- ए- क्रीडंत ४- ए- गछ

----

( बी-१)
यक्षैः परिवृतः श्रीमानायथौ नरवाहनः ।

सर्वैः पितृगणैर्युक्तो धर्मराजः समाययौ ।। १६

ए(१) (बी२)
मूर्तिमत्कुलशैलाद्यैः सिंधुशाखिपरिग्रहः ।

द्विरदाद्विश्वकर्तारं प्राप्तवान्सलिलेश्वरः ।। १७

अग्निर्नैर्ऋतकोणेशः पवनो मृगवाहनः ।

ईशानो वृषभारूढः प्राप्तस्तत्र महोत्सवे ।। १८
(बी३) (बी४) (बी५)
गंधर्वाः किंनराः सार्द्धं तथा चाप्सरसां गणैः ।

बी६
आदित्या वसवो रुद्राः सिद्धाः साध्या मरुद्गणाः ।। १९

सर्वैः परिवृतो नागैर्वासुकिः समदृश्यत ।
बी७
अन्ये च सर्वे मुदितास्तमलंचक्रुरबुधिं ।। २०

तीर्थानामथ सर्वेषां नदीनां च जलैः शुभैः ।

औषधिभिर्गिरीन्द्राणां चक्रे स्नानं सनातनः ।। २१

हेमपत्रप्रतीकाशं वस्त्र-द्वयमुपाददे ।
बी८ बी ६
कर्पूरचंदनरसं रागमंगेष्वकल्पयत् ।। २२

मुक्तामणिमयाश्चित्रा हारा अहरिणा धृताः ।
(बी-१०) ए(२) बी ११
तथा च रत्नकोटिभिः स्फुरत्कुंडलमंडनम् ।। २३

तदा पीतांबरो भाति सविद्युदिव तोयदः ।। २४

-----

१- ई बी- श्रीमान् आयर्थोनरवामनः, २- ई बी- मकुलशैलाद्ये, ई(बी-३) गंधर्वेः, (बी-४)ई-कि:रः, (बी ५) ई- साद्ध, ई बी-६ साध्य, ई बी-७ ताः तमलं, ए मूर्ति, १(१) ए ईशान , ८-ई बी - सैः, ९ ई बी थकल्पयेप्त, ई बी-१० अथकलितकोहीर ई बी ११- मंडल, ई हेम-पात्र ६(१)ए- अहरिणा च स्फुरत्कुंडलमंडनम् ।

ए (१) मूर्ति

ए (२) टि

-------

अथारूह्य विहंगेंद्रं सुरैः परिवृतो हरि : ।
जगामाकाशमाक्रम्य तेजसा भासयन् दिश : ।। २५

ए(१) १(बी) (२बी)
मणिमालार्चितं विष्णोर्मुखं श्रीमद्विराजत ।
१ इ (३ बी)
प्रत्यूषेऽम्भोजवाकीर्णं स्फुरदिंदीवरं यथा ।। २६

३(१) (४ बी)
ततोऽम्बरे दुंदुभयः प्रणेदु दिशः समस्ताः प्रतिनादयतः ।
४(१) ५ बी
गधर्वविद्याधरकिन्नराणां गीतस्वनैर्धरवनी च पूर्णा ।। २७

ब्रह्मर्षिवेदध्वनिशंखनादा स्तदा भृशं भूधरकंदराणाम् ।
गर्भेषु ए(२) ६ बी
निपत्य ~~मध्ये~~ शिलातलेषु क्लिप्रमग्ना बहुलीबभूवुः ।। २८

निस्तंद्रनीलोत्पलपेशलस्य नक्षत्रमाला मधुसूदनस्य ।
(७ बी) (८)
रराज कंठे सुतरामुपांते बालार्कमालेव बलाहकस्य ।। २९

छत्रंदधारास्य सहस्त्रनेत्रः प्रकीर्णकै दस्त्रयुग विशुभे ।
(९बी)
गंधान्ववो गंधवहो महार्घ्यानिवाकिरत् पुष्पचयं वसंतः ।। ३०

(१०बी)
कणोपलाभे नभसि प्रवेशाल्लेखां दधानो निजपक्षहेमः ।
तार्क्ष्यस्त्रिलोकीशरणं मुकुंदं वदन्भृगोराश्रममाससाद ।। ३१

अथार्घ्यमर्घ्यार्थि ददौ मुनींद्रो भृगुर्वरेण्याय वराय तस्मै ।
त्रैलोक्यगोप्तः स च तेन दत्तां ~~प्रति~~ प्रत्यगृह्णीतां मधुपर्कयोग्यां ।।३२

-----

इ १ बी मु, ई (२बी)- मध्यराजतः, ई (बी बी) स्मरमिंदीवरंयथा , ई(४ बी) प्रतिभददेत्यः, ई (५बी-) स्वनैर्येश्वनी, ई ६ बी- बभूवुः ए विभुवः, ई (७ बी) बलाक, ई (८ बी) विवला, ई ९ बी गंधानवा योगंधवहोमहार्ह निवाकिरत्पुष्प, ई १० बी हेम्नः, ११ बी प्रत्यगृही, १ इ प्रत्यूषोमोज १२ ए मधुकर्योग्यां, ३(१) ए ततो बरे, ४(१)ए किंन, ए प्रत्युषो म्भोल, १२-ए मधुकर्यौग्यां, ए(१) विष्णोर्मुखं । ए(२) बहुलबिभुवः , ए (३) प्रत्यगृहीतां

-------

मुनींद्रकन्याभिरुपावृतानि प्रत्यंगमस्याश्चविभूषणानि ।
श्रियोऽथ कन्या अपि तामभिख्यां दधुर्नं या वाचि पदं करोति ।। ३३
~~दधुर्न या वाचि पदं करोति~~
(बी १) (बी २) बी ३
पौष्पं किरीटो मधुबिंदुजालैर्बभा विरेजुः परितस्तदानीं ।।
ए(१)
श्रियोऽनुरूपंवरमीक्षमाणा मुंचंति हर्षादिव बाष्पबिंदून् ।। ३४

(बी ४)
निवेश्य शाखासु विहंगपंक्तिः शैवालवल्लीमभि मुंचतीति ।।
(ए २)
देवी विवाहोत्सवजातहर्षाः कृष्णा मृगाश्चित्रगताश्चिवासन् ।। ३५
बी ५
वृंदारवृंदानि मरीचिजालैः स्तपावनं प्रावृतमाबभौ तत् ।।
बी ६
उद्वाहकाले मुनिकन्यकाया वासौ विचित्रं किल संदधानं ।। ३६

बी-७ (ए३)
अथ कमलसमवानुयोगाज्ज्वलति कृशानौ सनातनो देवः ।।
(बी-८)
भृगुदुहितृपाणिपुंडरीकं सह मनसा संगृहीतवानीशः ।। ३७

ए(४)
अपलदवनिपीठे वायुभागादुदग्रा ।
बी ९ बी १०
सुरभिकुसुमवृष्टिः शंखनादानविद्वान् ।
बी ११(ए-५) बी १२ बी १३
ननृतुरपि समंतादप्सरालीर्विशंतः ।
सुरमुनिवरसंघाः साद्धमीशेन तत्र ।। ३८

प्रदक्षणीकृत्य स वेदिमध्ये हुताशनम् + श्रीरमणः स्वयंभूः ।
उत्संगमारोप्य भृगोस्तनूजां जात्पति गैतुमियेष राजन् ।। ३९

-----

ई (बी-१) जालं, ( बी२) ई- भ्रमापिरेजु, बी -३ निं, ई (बी ४) राजलगर्भैबुसवृक्षसाराः
बी-५ मौ, ई बी ६- वः , ई बी ७- कमूल, ई बी-८ भृगुहितृपाणीं, ई बी ९- कुशम् .
ई बी-१० सं, ई बी ११- ननृ, बी -१२ संम, ई बी -१३ दंपालि ।

-----

(ए १) नुरूपं ( ए२) समनात (ए३) ज्ज्वलित (ए४) अनवद
(ए ५) अनृतु ।

------------

अथसुरमुनिवृंदपूजिते स्मिन् ।
बी १ बी २
भृगुरपि विदधे कुलस्य कृत्यमाशु ।।

इति परिणीय जगद्धिताय देवीं ।
हरिरूरगद्विणमारुरोह राजन् ।। ४०

ए(१)
तदा कौतूहलं राजन् जातं तच्छृणु सर्वतः ।
शम्भुब्रह्ममहेन्द्रादिदेवाः सर्वेऽप्यौत्सुकाः ।।
स्थावरा जंगमा जीवा स्तदेवोढा इवाभवन् ।। ४१

श्रीपाणिग्रहणाख्यानमिदं यः श्रृणुयान्नरः ।
(ए २)
तस्य सर्वेश्वरी लक्ष्मीर्न जातु स्यात् पराङ्मुखी ।।४२

इतिश्री स्कंदपुराणे स्काशीति साहस्त्र्यां संहितायां ब्राह्म्यविभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये लक्ष्मीपाणिग्रहणं नाम सप्तमोऽध्यायः ।। ७ ।।

-----

ई बी-१ विधे, २- ई बी - मात्रु

----

श्लोक - हरिरुरगविष्णु - - - - स्थावरजंगमा जीवा स्तदेवोढाइवाभवन्

ए(१) कौतुहलं ए (२) लक्ष्मी ए (३) परांमुखी

------